
| | |
|---|---|
| 14 | Fine Arts, Performing Arts and Theatre ललितकला प्रदर्शणकला अभिनयकला वा |

## हस्तशिल्पप्रतियोगिता

## 09/12/2021

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये ज्योतिषविभागस्य नेतृत्वे संस्कृतसप्ताहस्य अवसरे



हस्तशिल्पप्रतियोगितायाः आयोजनं कृतम् । अध्यक्षता कुलपति प्रो. विजय कुमार सीजी महोदयेन कृतम् ।हस्तशिल्पेषु प्राकृतं समुचायं च द्विविधप्रतियोगितानां आयोजनं कृतम् । शुद्धप्राकृतिकसामग्रीणां उपयोगेन निर्मितसामग्रीणां संयोजनेन च शिल्पानि निर्मिताः आसन् । छात्राः मृत्तिका, तृण, काष्ठ, पाषाण इत्यादिभ्यः अनेकानि कलाकृतयः निर्मितवन्तः । अस्मिन् अक्षयपाण्ड्यः कर्गदस्य बैलशकटं कृत्वा प्रथमस्थानं प्राप्तवान् तथा च कृष्णशर्मा पार्थिवशिवलिंगं कृत्वा प्रथमस्थानं प्राप्तवान् । अक्षत जोशी तथा मोइना शुक्ला द्वितीय तथा शुभम् मिश्रा, जय शर्मा तृतीय स्थानं प्राप्तम् । मुख्यातिथिः कालिदास संस्कृत अकादमीयाः उपनिदेशकः डॉ. योगेश्वरी फिरोजिया आसीत् । सः अवदत् यत् कस्यचित् कृतेः सूक्ष्मतायाः अवगमनम् अपि कलायाः एकः पक्षः अस्ति । छात्राः कलासारं ज्ञातव्याः, एतत् शिल्पकारस्य कलाकारस्य वा मुख्यं लक्ष्यं भवेत्। विशेषातिथिः, उज्जैनस्य हस्तशिल्पमेले विशेषा भूमिकां निर्वहन् हस्तशिल्पी छगनलाल बंजारा अपि मार्गदर्शनं दत्तवान्। प्रतियोगितायां 25 प्रतिभागिनः आसन् । साहित्य विभागस्य अध्यक्षः डॉ. तुलसीदास परौहा, ज्योतिष एवं ज्योतिर्विज्ञान विभागस्य डॉ. शुभम् शर्मा आदि प्राध्यापकाः उपस्थिताः आसन् । संचालनं डॉ विजय कुमार महोदयेन कृतं तथा च धन्यवाद ज्ञापनं डॉ विनोद पाण्डेय महोदयेन दत्तम्।

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)

# महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय

## Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya

देवासमार्ग, उज्जैन, (मध्यप्रदेश). 456010

Website:- www.mpsvv.ac.in

---

## कार्यक्रमस्य विविधचित्राणि प्रकाशितांशश्च






### पाणिनिसंस्कृत-विश्वविद्यालये हस्तशिल्पस्पर्धाया: आयोजनम्

(वार्ताहर:- डॉ.दिनेश: चौबे)

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य ज्योतिष-ज्योतिर्विज्ञान विभागस्य तत्त्वावधाने सोमवासरे हस्तशिल्प प्रतियोगितायाः आयोजनं करिष्यते। इयं प्रतियोगिता प्राकृत एवञ्च सम्मुच्चय वर्गाधारितं भविता। प्राकृतवर्गे प्राकृतिक संसाधनैः समुच्चयवर्गे च विभिन्नवस्तूनां समायोजनं कृत्वा प्रारूपं निर्मीयते प्रतियोगितायां विश्वविद्यालयस्य महाविद्यालयस्य च छात्राः भागं नेष्यन्ति प्रतियोगितायाः उद्देश्यं छात्रेषु कलाकौशलस्यविकासेन सह तेषां बौद्धिकविकासः च भवेत् इत्यस्ति।






REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)

# महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय

## Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya

देवासमार्ग, उज्जैन, (मध्यप्रदेश). 456010

Website:- www.mpsvv.ac.in











REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)